# JAIN COLLEGE

463/465, 18th Main Road, SS Royal, 80 Feet Road, Rajarajeshwari Nagar,
Bangalore - 560 098

**Date:** **SUBJECT: SANSKRIT**

**II PUC**
**MOCK - I**

**Timings Allowed: 3 Hrs15Minutes** **Total Marks: 100**

I. एकवाक्येन संस्कृतभाषया उत्तरं लिखत । 10×1=10.

1) मर्त्यानां कर्मभूमिः का ?
2) विक्रमादित्यः कथं देशान्तरं निर्गतः ?
3) परिव्राजकस्य अवस्थां दृष्ट्वा कः जहास ?
4) शारद्वतः कः ?
5) रणाप्रतापस्य पिता कः ?
6) महाश्वेता किम् अजिघ्रत् ?
7) शान्त्याः पत्युः नाम किम् ?
8) कः कर्णस्य रक्तम् अपिबत् ?
9) अर्थान् कथं चिन्तयेत् ?
10) कृष्णशास्त्रीमहोदयेन आरब्धा पत्रिका का ?

II. द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । 5×2=10.
[पञ्चानामेव]

11) पञ्चद्वीपानां नामानि लिखत ।
12) सुन्दरः किमर्थं स्वग्रामं त्यक्तवान् ?
13) भारतसर्वकारः राणाप्रतापाय कथं गौरवम् असूचयत् ?
14) शान्तिः किमर्थं तरुणं द्रष्टुम् आगतवती ?
15) नरविग्रहाः देवाः के ?
16) बाल्ये शास्त्रिणां संस्कृताध्ययनम् ।
17) विक्रमादित्यः राक्षसं किं उपदिशति ?

III. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड-आङ्ग्लभाषया वा कुरुत । 3×3=09.
[त्रयाणामेव]

18) ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम् ।
अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥

19) मञ्जूषां तां च गङ्गायां तथैवोर्ध्वस्थदीपिकाम् ।
कृत्वा तत्याज निक्षिप्य घोरं वानरमन्तरे ॥

20) कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति धर्मांशौ कथमाविर्भविष्यति ॥

21) विषयामिषलोभेन मनः प्रेरयतीन्द्रियम् ।
तन्निरुन्ध्यात् प्रयत्नेन जिते तस्मिन् जितेन्द्रियः ॥

22) विजृम्भते वेदसरस्वतीमयं तपोवनं निर्मलकर्मशोभितम् ।
विनीतशिष्यैरपनीतकल्मषैरधिष्ठितं विश्वगुणाभिरञ्जितम् ॥

IV. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । 4×2=08
[चतुर्णामेव]

23) मया परार्थमेतत् शरीरं दीयते स्वेच्छया ।
24) अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ।
25) कुत्रापि गत्वा धनं संग्रहिष्यामि ।
26) धैर्यधना हि साधवः ।
27) भवदनुग्रह एव रक्षाकवचम् ।
28) परीक्षार्थम् इतोऽपि समयावकाशः विद्यते ।

V. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । 5×5=25.
[पञ्चानामेव]

29) भारतस्य भौगोलिकचित्रणं कुरुत ।
30) विक्रमादित्यस्य परोपकारगुणं वर्णयत ।
31) पुण्डरीकस्य जन्मवृत्तान्तं लिखत ।
32) सा शान्तिः ।
33) कर्ण-परशुरामयोः संवादः ।
34) महाराणाप्रतापेन अनुभूता कष्टपरम्परा ।
35) 'निर्विमर्शा हि भीरवः' इति शीर्षिकां समर्थयत ।
36) विद्यार्थिनां कृते कृष्णशास्त्रिणां सन्देशः ।

VI. मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत। 4×1=4

37) अङ्गुलीयकशून्या मे ------ ।

38) कष्टपरम्परायाः अपि काचन ------ भवेत्।

39) ------ मम दृष्टिपथात्।

40) नवाम्रवापी ------ न पश्येत।

[ नरकम्, अपेहि, सीमा, प्रजापतिः ]

VII. 41) संयोजयत। 4×1=4

| क | ख |
|---|---|
| श्रुत्वा | योद्धारः |
| पुत्थलिका | ज्ञानमवाप्नोति |
| बिल्लाः | वस्त्रापणम् |
| गन्धवहः | वायुः |

VIII. रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत। [त्रयाणामेव] 3×1=3

42) विमर्शकेन कृतीनामध्ययनं सम्यक् कर्तव्यम्।

43) शान्तिः धनं न स्वीचकार।

44) वैदेशिकः वाणिज्यार्थम् आगच्छन्ति स्म।

45) कालिदासस्य सप्तः कृतयः।

46) कन्या मञ्जूषायां प्रवेशिता।

IX. यथानिर्देशं कुरुत। [चतुर्णामेव] 4×3=12

47) सन्धिं विभजत / संयोजयत। [त्रयाणामेव]

वाक्+नियमः, तल्लीनः, षडाननः, रामश्च, हरे+ए

48) विग्रहवाक्यं / समस्तपदं लिखत। [त्रयाणामेव]

तपोधनं, गान्धर्वेण विधिना, योगिनः वेषम्, गुरोपदेशः

49) लिङ्ग-विभक्ति-वचनानि लिखत । [द्वयोरेव]

अम्बया, मह्यम्, पादयोः, महाशयस्य,

50) लकार-पुरुष-वचनानि लिखत । [द्वयोरेव]

अपश्यम्, भवन्तु, वदन्ति, भवेत्

51) वाक्यदोषं परिहरत ।

i) अम्बा सह स्नातुम् अभ्यागमम् ।

ii) तस्य विना तृणमपि न चलति ।

iii) भवान् गन्तुमर्हसि ।

52) प्रयोगं परिवर्तयत ।

राणाप्रतापः प्रतिज्ञां स्वीकृतवान् ।

अथवा

वत्सः मातरं गच्छति ।

53) अलङ्कारं सलक्षणं निर्दिशत ।

मयूरः नृत्यति ।

अथवा

कुसुमगन्धेन मधुकरीव आकृष्यमाणा ।

54. कन्नडभाषया - आङ्ग्लभाषया वा अनुवदत । 5.

क्रीडा मानवस्य नितराम् आवश्यकी । क्रिडया शक्तिः वर्धते । उल्लासः उत्पद्यते । आरोग्यं जायते । मनः विकसति । जीवनोत्साहः एधते । एकताभावः सम्पद्यते । मैत्री विस्तारं गच्छति, अतः खलु ज्येष्ठाः एकघण्टापर्यन्तं तुल्यशीलवयोभिः क्रीडितव्यमिति उपदिशन्ति ।

55. संस्कृतभाषया अनुवदत । 5.

ಒಮ್ಮೆ ವಿಶ್ವಾಮಿತ್ರ ಮಹರ್ಷಿಗಳು ದಶರಥ ಮಹಾರಾಜನ ಆಸ್ಥಾನಕ್ಕೆ ಬಂದರು. ಯಜ್ಞರಕ್ಷಣೆಗಾಗಿ ಬಾಲಕರಾದ ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ತಮ್ಮ ಜೊತೆ ಕಳುಹಿಸುವಂತೆ ಕೇಳಿಕೊಂಡರು. ಪುತ್ರವಾತ್ಸಲ್ಯದಿಂದ ದಶರಥನು ದುಃಖಿತನಾದನು. ಕುಲಪುರೋಹಿತರಾದ ವಸಿಷ್ಠರು ವಿಶ್ವಾಮಿತ್ರರ ಬೇಡಿಕೆಯನ್ನು ಪೂರೈಸುವಂತೆ ದಶರಥನಿಗೆ ನುಡಿದರು. ಲೋಕಕಲ್ಯಾಣಕ್ಕಾಗಿ ದಶರಥನು ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ಕಳುಹಿಸಿದನು.

Once the sage Vishwamitra came to the court of the King Dasharatha. He requested to send the boys Rama and Lakshmana to protect his sacrifice. Dasharatha felt sad due to affection towards his children. Vasishtha, the preceptor of the family, advised Dasharatha to fulfil Vishwamitra's request. Dasharatha sent Rama and Lakshmana for the welfare of the world.

56. इदं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत । 5x1=5

भारतीयसंस्कृतिः संस्कृतम् आश्रित्य तिष्ठति । भारतस्य आत्मा संस्कृत्या प्रकाशते । संस्कृतस्य पुनरुज्जीवनं यदा भविष्यति तदा 'भारतम् विश्व गुरुः' इति ख्यातिम् अलभत । विदेशेभ्यः छात्राः अत्र अध्ययनाय आगच्छन्ति स्म । नलन्दा तक्षशिलादि विश्वविद्यालयेषु विविधानि शास्त्राणि तेभ्यः पाठ्यन्ते स्म । पुनः विश्वगुरुत्वं प्राप्तुं भारतेन संस्कृतस्य अवलम्बनं करणीयमेव ।

1. भारतस्य आत्मा कया प्रकाशते ?
2. छात्राः अत्र अध्ययनाय कुतः आगच्छन्ति स्म ?
3. पुनः विश्वगुरुत्वं प्राप्तुं भारतेन किं करणीयम् ?
4. संस्कृतस्य पुनरुज्जीवनं कदा भविष्यति ?
5. शास्त्राणि केभ्यः पाठ्यन्ते स्म ? कुत्र ?

<u>अथवा</u>

धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

=o=